Total Pages—4

**PG/IS/SAN-101/13**

# MA 1st Semester Examination, 2013

## SANSKRIT

PAPER – SAN- 101

*Full Marks* : 40

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

**1.** अधोनिर्दिष्टेषु मन्त्रेषु किमपि मन्त्रद्वयमृषिच्छन्दो-देवतानिर्देशपूर्वकं सायणदिशा संस्कृतभाषया देवनागरीलिप्यां व्याख्यायताम् । 6 × 2

(*a*) अग्निर्होता कविक्रतुः सत्यश्चित्र श्रवस्तमः ।
देवो देवेभिरागमत् ॥

( *Turn Over* )

(*b*) इन्द्रवायू इमे सुता उप प्रयोभिरागतम् ।
इन्दवो वामुशन्ति हि ।।

(*c*) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु ।।

(*d*) उषः प्रतीची भुवनानि विश्वा-
ऊर्ध्वा तिष्ठस्यमृतस्य केतुः ।
समानमर्थं चरणीयमाना
चक्रमिव नव्यस्याववृत्स्व ।।

(*e*) कालो अश्वो वहति सप्तरश्मिः
सहस्राक्षो अजरो भूरिरेताः ।
तमारोहन्ति कवयो विपश्चित-
स्तस्य चक्रा भुवनानि विश्वा ।।

**2.** अधस्तनयोरेकतरस्य भाष्यवचनस्याशयः संस्कृतभाषामाश्रित्य देवनागरीलिप्यां स्फुटीक्रियताम् — 6

(*a*) तस्मिन् सूक्ते प्रथमाया ऋचो द्विचीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः ।

(*b*) प्रातःसवने वैश्वदेवग्रहणादूर्ध्वं प्रउग-शस्त्रं होत्रा शंसनीयम् ।

3. अधोलिखितेषु पदेषु कयोश्चिद् द्वयोः व्याकरणप्रक्रियया साधनरीतिः संस्कृतभाषायां प्रदर्श्यताम् — 2 × 2

(*i*) दाशुषे

(*ii*) उरूची

(*iii*) दर्शत

(*iv*) अश्नवत् ।

4. उषोदेवताया वेदगतं चारित्रिकं वैशिष्ट्यं प्रतिपाद्यताम् । 8 × 1

*अथवा*

कालसूक्तस्य वैशिष्ट्यं प्रतिपाद्यताम् ।

5. ऐतरेयब्राह्मणस्य कस्मिन् वेदे अन्तर्भावः ? ग्रन्थस्यास्य 'ऐतरेयम्' इति नामकरणे किं बीजम् ? शुनःशेपोपाख्याने रोहिताजीगर्तयोर्यः संवादः समुपलभ्यते सः सरसतया समुपवर्ण्यताम् । 10

*अथवा*

अधःसमुद्धृतं ब्राह्मणवचनद्वयं संस्कृतभाषया देवनागरीलिप्यां व्याख्यायताम् —

(*a*) चरन्वै मधु विन्दति चरन् स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन् ॥

(*b*) तस्य वा एतस्य ब्रह्मयज्ञस्य
व्वागेव जुहूर्मन उपभृच्चक्षुर्ध्रुवा मेधा
स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनम् ।

---